# श्रीसुरसरस्वतीसभा, शृङ्गेरि

## प्रवेशपरीक्षा

## प्रथमपत्रिका

दिनाङ्कः - 02-02-2025 अङ्काः - 100

पूर्वाह्ने – 10:00 वादनतः 1:00 वादनपर्यन्तम् समयः – घण्टात्रयम्

सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि

**1. अष्टानाम् एकवाक्येन उत्तरं लिखत । 8**

१. श्रीशङ्करजयन्तीमहोत्सवः कदा आचर्यते ?

२. पाठे निर्दिष्टस्य पाण्ड्यराजस्य नाम किम् ?

३. कः पुष्पभूतये राजतानि पुण्डरीकाणि पुष्पभूतये उपनिन्ये ? तस्य नाम किम् ?

४. कीदृशः आगमः अर्थदर्शनं कुरुते ?

५. कः उन्मार्गप्रवर्तकः पुरुषं नाशयति ?

६. कालिदासस्य खण्डकाव्ये के ?

७. शान्तनवः कः ?

८. शङ्खचूडं कः ररक्ष ?

९. देहसारूप्यं वृत्तिसारूप्यं च कयोः भवति ?

१०. “अयमसौ मम ज्यायान्” इति कः वदति? कः ज्यायान् ?

**2. षण्णां द्वित्रैः वाक्यैः उत्तरं लिखत । 12**

१. लक्ष्मीः केभ्यः किं किम् अगृह्णात् ?

२. क्षितिविवरात् कः उज्जगाम ? सः किं जगाद ?

३. सिद्धः स्वचरणोदकसेवाकृद्भ्यः कथम् अनुगृहीतवान् ?

४. शिशुकलहमाकर्ण्य के के आगच्छन्ति ?

५. अप्सरसः कुतः उच्चैः उच्चुक्रुशुः ?

६. कीदृशः विग्रहः कं हन्ति ?

७. यदा मन्दाकिनी रथरश्मीन् जग्राह तदा गाङ्गेयेन किमूचे ?

८. नायकेन वध्यशिलायां कथं भूतं सुखं प्राप्तम् ?

**3. त्रयाणां सप्ताष्टैः वाक्यैः उत्तरं लिखत । 9**

१. भीष्मपरशुरामयोः अम्बालक्षितदोषम् आधारीकृतविवादं विवृणुत ।

२. भरतः उर्वशीं कुतः किमिति च शशाप? इन्द्रदत्तशापपरिहारोपायं च विवृणुत ।

३. हर्षजननकाले किं किम् अभूत् ?

४. सिद्धवेषधरेण शिवेन शिलागजेन इक्षुकाण्डकबलीकरणस्य वृत्तान्तं वर्णयत ।

५. लक्ष्मीः कान् कान् परिहरति ?

**4. वाक्यत्रयं सप्रसङ्गं विवृणुत । 9**

१. कोऽप्यस्मिन् क्षत्रियपोतके पौरुषातिशयः ।

२. सखे! नायमवसरो मम शतक्रतुं द्रष्टुम् ।

३. अपरिणामोपशमो दारुणो लक्ष्मीमदः ।

४. प्रायेण परोत्कर्षासहिष्णवो हि लोकाः ।

५. भुजे वीर्यं निवसति, न वाचि ।

**5. पद्यद्वयं पूर्णं लिखत । 6**

१. शान्त्याद्याः .......................... देहि माम् ॥

२. सहसा .......................... सम्पदः ॥

३. शिवम् .......................... जिगीषवः ॥

**6. एकस्य पद्यस्य सान्वयम् अर्थं लिखत । 4**

१. अहो प्रासादिकं रूपमनुभावश्च पावनः ।
स्थाने रामायणकविर्देवीं वाचं व्यवीवृतत् ॥

२. क्रोडीकरोति प्रथमं जातं नित्यमनित्यता
धात्रीव जननी पश्चात् तदा शोकस्य कः क्रमः ॥

**7. एकस्य कवेः देशकालकृतिमहत्त्वादीनां विषये लिखत । 4**

१. श्रीसच्चिदानन्दशिवाभिनवनृसिंहभारतीस्वामिनः २. नीलकण्ठदीक्षितः

**8. चतुर्णां रूपाणि परिचाययत ।** **4**

१. केषुचित्  २. शतक्रतुना  ३. नाम्नि
४. दुकूलधारी  ५. द्विरदः  ६. देहि

**9. चत्वारि पदानि वाक्ये योजयत ।** **4**

१. नैर्घृण्यम्  २. पप्रच्छ  ३. त्रातुम्
४. प्रणम्य  ५. मघवा  ६. दिक्षु

**10. चतुर्णां पर्यायपदानि लिखत ।** **4**

१. मस्करी  २. धीवरः  ३. सुपर्वलोकः
४. रहः  ५. रोधः  ६. अभ्रम्

**11. चतुर्णां सन्धिं विभज्य नाम लिखत ।** **6**

१. राज्यतन्त्रेऽस्मिन्  २. पुण्यालिम्  ३. सर्वैरपि
४. चञ्चच्चञ्च्वा  ५. तदादिश्यताम्  ६. वृत्तिरुपैति

**12. चतुर्णाम् एकं पदं लिखत ।** **4**

१. चौर्येण अवाप्तं धनम्  २. मुखे भवम्  ३. कर्तुम् इच्छा
४. तरुणतृणविशिष्टदेशः  ५. क्षत्रियेषु अधमः  ६. शतक्रतोः इयम्

**13. चतुर्णां व्याकरणविशेषं लिखत ।** **8**

१. विनयन्ते  २. वाक्सवित्रि  ३. रोषमयम्
४. आदायचरः  ५. भवते रोचते  ६. सुदिनायते

**14. चतुर्णां विग्रहवाक्यानि विलिख्य समासनामानि लिखत ।** **8**

१. गन्धर्वराजः  २. महामन्त्रैः  ३. कथान्तरेषु
४. अधीतसर्वशास्त्रस्य  ५. तरुपुष्पफलानि  ६. यथेच्छम्

**15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणि लिखत ।** **6**

१. चकार  २. आशास्महे  ३. मन्ये  ४. समाश्वसितु

**16. चतुर्णां रिक्तस्थानानि पूरयत ।** **4**

१. प्रभाकरपत्नी ___________ आसीत् ।

२. कदाचित् ___________ प्रमोदाय कल्पते ।

३. अम्बा ___________ अकामयत ।

४. सह शिष्यैः ___________ हरः ।

५. शममुपयातु ममापि ___________ ।

-------------------------